No. १०३४·घ

Title महाभारते शान्तिपर्वणि उत्तमानुशासने (विष्णुसहस्रनाम

Author वेदव्यास

Extent ६ Age

Subject स्तोत्रम् · सम्पूर्णम्

नं० १०३४-घ

महाभारते

विष्णुसहस्रनाम (स्तोत्रम्)

पत्रे

नं० १०३४-घ

पत्राणि ८ (सम्पूर्णम्)



वि॰स॰ श्रीगणेशायनमः श्रीराधावल्लभोजयति ओं यस्यस्मरणमात्रेणजन्मसंसा
१ रबंधनात् विमुच्यतेनमस्तस्मैविष्णवेप्रभविष्णवे १ नमःसमस्तभूतानामा
दिभूतायभूभृते अनेकरूपरूपायविष्णवेप्रभविष्णवे २ वैशंपायनोवाच॥
श्रुत्वाधर्मानशेषेणपावनानिचसर्वशः युधिष्ठिरःशांतनवंपुनरेवाभ्यभाष
त ३ युधिष्ठिरोवाच किमेकंदैवतंलोके किंवाप्येकंपरायणं स्तुवंतःकंकमर्चंतः
प्राप्नुयुर्मानवाःशुभं ४ कोधर्मःसर्वधर्माणांभवतःपरमोमतः किंजपन्मुच्यते
जंतुर्जन्मसंसारबंधनात् ५ भीष्मोवाच जगत्प्रभुंदेवदेवमनंतंपुरुषोत्तमं स्तुवन्
नामसहस्रेणपुरुषःसततोत्थितः ६ तमेवचार्चयंनित्यंभक्त्यापुरुषमव्ययं ध्या
यंस्तुवन्नमस्यंश्चयजमानस्तमेवच ७ अनादिनिधनंविष्णुंसर्वलोकमहेश्वरं॥
लोकाध्यक्षंस्तुवंनित्यंसर्वदुःखातिगोभवेत् ८ ब्रह्मण्यंसर्वधर्मज्ञंलोकानांकी
र्त्तिवर्द्धनं लोकनाथंमहद्भूतंसर्वभूतभवोद्भवं ९ एषमेसर्वधर्माणांधर्मोधिक
तमोमतः यद्भक्त्यापुंडरीकाक्षंस्तवैरर्चेन्नरःसदा १० परमंयोमहत्तेजःपरमंयो
महत्तपः परमंयोमहद्ब्रह्मपरमंयःपरायणं ११ पवित्राणांपवित्रंयोमंगलानां
चमंगलं दैवतंदेवतानांचभूतानांयोव्ययःपिता १२ यतःसर्वाणिभूतानिभवंत्यादि
युगागमे यस्मिंश्चप्रलयंयांतिपुनरेवयुगक्षये १३ तस्यलोकप्रधानस्यजगन् १
नाथस्यभूपते विष्णोर्नामसहस्रंमेशृणुपापभयापहं १४ यानिनामानिगौणा

त्रिदिवख्यातानिमहात्मनः ऋषिभिःपरिगीतानितानिवक्ष्यामिभूतये १५ ऋ
षिर्नाम्नांसहस्रस्यवेदव्यासोमहामुनिः छंदोनुष्टुप्तथादेवोभगवान्देवकीसु
तः १६ ओंविष्णुंजिष्णुंमहाविष्णुंप्रभुंविष्णुंमहेश्वरं अनेकरूपदैत्यांतंनमा
मिपुरुषोत्तमं १७ श्रीवेदव्यासोवाच ओंअस्यश्रीविष्णोर्दिव्यसहस्रनामस्तो
त्रमालामंत्रस्य श्रीभगवान्वेदव्यासऋषिः अनुष्टुप्छंदः श्रीकृष्णपरमात्मा
देवता आत्मयोनिःस्वयंजातइतिबीजं देवकीनंदनःस्रष्टेतिशक्तिः उद्भवःक्षो
भणोदेवइतिपरमोमंत्रः शंखभृन्नंदकीचक्रीतिकीलकं त्रिसामासामगःसा
मेतिकवचं शार्ङ्गधन्वागदाधरइत्यस्त्रं ॐविश्वंविष्णुर्वषट्कारइतिध्यानम्
श्रीकृष्णप्रीत्यर्थेविष्णोर्दिव्यसहस्रनामजपपाठेविनियोगः ॐशिरसि श्री
वेदव्यासऋषयेनमः मुखे अनुष्टुप्छंदसेनमः हृदि श्रीकृष्णपरमात्मादेव
तायैनमः गुह्ये अमृतांशूद्भवोभानुरितिबीजायनमः पादयोः देवकीनंदनः
स्रष्टेतिशक्तयेनमः सर्वांगे शंखभृन्नंदकीचक्रीतिकीलकायनमः करसंपु
टे ममश्रीकृष्णप्रीत्यर्थेपाठेविनियोगः इतिऋष्यादिन्यासः अथकरन्यासः
ॐविश्वंविष्णुर्वषट्कारइत्यंगुष्ठाभ्यांनमः ॐअमृतांशूद्भवोभानुरितितर्ज
नीभ्यांनमः ॐब्रह्मण्योब्रह्मकृद्ब्रह्मेतिमध्यमाभ्यांनमः ॐसुवर्णबिंदुरक्षो
भ्यइत्यनामिकाभ्यांनमः ॐआदित्योज्योतिरादित्यइतिकनिष्ठिकाभ्यांनमः

वि. स. २

ॐ शार्ङ्गधन्वा गदाधर इति करतलकरपृष्ठाभ्यां नमः इति करन्यासः अथ हृद
यादिन्यासः ॐ विश्वं विष्णुर्वषट्कार इति हृदयाय नमः ॐ अमृतांशूद्भवो भा
नुरिति शिरसे स्वाहा ॐ ब्रह्मण्यो ब्रह्मकृद्ब्रह्मेति शिखायै वौषट् ॐ सुवर्णबिं
दुरक्षोभ्य इति कवचाय हुं ॐ आदित्यो ज्योतिरादित्य इति नेत्रत्रयाय वौषट्॥
ॐ शार्ङ्गधन्वा गदाधर इत्यस्त्राय फट् इति षडंगन्यासः श्रीविष्णोर्दिव्यस
हस्रनामजपमहं करिष्ये इति संकल्पः ॐ विश्वं विष्णुरिति ध्यानम् श्रीपु
रुषोत्तमाराधने सर्वपापक्षयार्थे जपे पाठे विनियोगः अथ ध्यानम्॥ ॐ
विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः भूतकृद्भूतभृद्भावो भूतात्मा भूतभा
वनः १९ पूतात्मा परमात्मा च मुक्तानां परमा गतिः अव्ययः पुरुषः साक्षी क्षेत्र
ज्ञोक्षर एव च २० योगो योगविदां नेता प्रधानपुरुषेश्वरः नारसिंहवपुः श्रीमा
न्केशवः पुरुषोत्तमः २१ सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः संभवो
भावनो भर्ता प्रभवः प्रभुरीश्वरः २२ स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः
अनादिनिधनो धाता विधाता धातुरुत्तमः २३ अप्रमेयो हृषीकेशः पद्मनाभो
मरप्रभुः विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः २४ अग्राह्यः शाश्व
तः कृष्णो लोहिताक्षः प्रतर्दनः प्रभूतस्त्रिककुब्धाम पवित्रं मंगलं परं २५ ईशा
नः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः २६ २

ईश्वरोविक्रमीधन्वीमेधावीविक्रमः क्रमः अनुत्तमोदुराधर्षः कृतज्ञः कृतिरात्मवान्
२७ सुरेशः शरणंशर्मविश्वरेताः प्रजाभवः अहः संवत्सरोव्यालः प्रत्ययः सर्वदर्शी
नः २८ अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः वृषाकपिरमेयात्मासर्वयो
गविनिःसृतः २९ वसुर्वसुमनाः सत्यः समात्मासम्मितः समः अमोघः पुंडरीका
क्षोवृषकर्मावृषाकृतिः ३० रुद्रोबहुशिराबभ्रुर्विश्वयोनिः शुचिःश्रवाः अमृतः
शाश्वतः स्थाणुर्वरारोहोमहातपाः ३१ सर्वगः सर्वविद्भानुर्विष्वक्सेनोजनार्दनः
वेदोवेदविदव्यंगोवेदांगोवेदवित्कविः ३२ लोकाध्यक्षः सुराध्यक्षोधर्माध्यक्षः
कृताकृतिः चतुरात्माचतुर्व्यूहः श्चतुर्दंष्ट्रः श्चतुर्भुजः ३३ भ्राजिष्णुर्भोजनंभोक्ता
सहिष्णुर्जगदादिजः अनघोविजयोजेताविश्वयोनिः पुनर्वसुः ३४ उपेंद्रोवा
मनः प्रांशुरमोघः शुचिरूर्जितः अतींद्रः संग्रहः सर्गोधृतात्मानियमोयमः ३५॥
वेद्योवैद्यः सदायोगीवीरहामाधवोमधुः अतींद्रियोमहामायोमहोत्साहोमहाब
लः ३६ महाबुद्धिर्महावीर्योमहाशक्तिर्महाद्युतिः अनिर्देश्यवपुः श्रीमानमेया
त्मामहाद्रिधृक् ३७ महेष्वासोमहीभर्ताश्रीनिवासः सतांगतिः अनिरुद्धः सुरानं
दोगोविंदोगोविदांपतिः ३८ मरीचिर्दमनोहंसः सुपर्णोभुजगोत्तमः हिरण्यना
भः सुतपाः पद्मनाभः प्रजापतिः ३९ अमृत्युः सर्वदृक्सिंहः संधातासंधिमान्स्थि
रः अजोदुर्मर्षणः शास्ताविश्रुतात्मासुरारिहा ४० गुरुर्गुरुतमोधामसत्यः

सत्यपराक्रमः निमिषोनिमिषःस्रग्वीवाचस्पतिरुदारधीः ४१ अग्रणीर्ग्रामणीः
श्रीमान्न्यायोनेतासमीरणः सहस्रमूर्द्धाविश्वात्मासहस्राक्षःसहस्रपात् ४२ ॥
आवर्त्तनोनिवृत्तात्मासंवृत्तःसंप्रमर्द्दनः अहःसंवर्त्तकोवह्निरनिलोधरणीधरः॥
४३ सुप्रसादःप्रसन्नात्माविश्वधृग्विश्वभुग्विभुः सत्कर्त्तासत्कृतिःसाधुर्जह्नुर्ना
रायणोनरः ४४ असंख्येयोप्रमेयात्माविशिष्टःशिष्टकृच्छुचिः सिद्धार्थःसिद्ध
संकल्पःसिद्धिदःसिद्धिसाधनः ४५ वृषाहीवृषभोविष्णुर्वृषपर्वावृषोदरः वर्द्ध
नोवर्द्धमानश्चविविक्तःश्रुतिसागरः ४६ सुभुजोदुर्धरोवाग्मीमहेन्द्रोवसुदोव
सुः नैकरूपोबृहद्रूपःशिपिविष्टःप्रकाशनः ४७ ओजस्तेजोद्युतिधरःप्रका
शात्माप्रतापनः ऋद्धःस्पष्टाक्षरोमंत्रश्चंद्रांशुर्भास्करद्युतिः ४८ अमृतांशू
द्भवोभानुःशशबिंदुःसुरेश्वरः औषधंजगतःसेतुःसत्यधर्मपराक्रमः ४९ भू
तभव्यभवन्नाथःपवनःपावनोनलः कामहाकामकृत्कांतःकामीकामप्रदःप्रभुः
५० युगादिकृद्युगावर्त्तोनैकमायोमहाशनः अदृश्योव्यक्तरूपश्चसहस्रजिदनं
तजित् ५१ इष्टोविशिष्टःशिष्टेष्टःशिखंडीनहुषोवृषः क्रोधहाक्रोधकृत्कर्त्तावि
श्वबाहुर्महीधरः ५२ अच्युतःप्रथितःप्राणःप्राणदोवासवानुजः अपांनिधि
रधिष्ठानमप्रमत्तःप्रकीर्त्तितः ५३ स्कंदःस्कंदधरोधुर्योवरदोवायुवाहनः वासु
देवोबृहद्भानुरादिदेवःपुरंदरः ५४ अशोकस्तारणस्तारःशूरःशौरिर्जनेश्वरः॥ २

अनुकूलः शतावर्त्तः पद्मी पद्मनिभेक्षणः ५५ पद्मनाभोरविंदाक्षः पद्मगर्भः शरीर
भृत् महर्द्धी ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः ५६ अतुलः शरभो भीमः समयज्ञो
हविर्हरिः सर्वलक्षणलक्षण्यो लक्ष्मीवान्समितिंजयः ५७ विक्षरो रोहितो मा
र्गो हेतुर्दामोदरः सहः महीधरो महाभागो वेगवानमिताशनः ५८ उद्भवः क्षोभणो
देवः श्रीगर्भः परमेश्वरः करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः ५९ व्यवसायो
व्यवस्थानः संस्थानः स्थानदो ध्रुवः परर्द्धिः परमस्पष्टोतुष्टः पुष्टः शुभेक्षणः ६०
रामो विरामो विरजो मार्गो नेयो नयोनयः वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्त
मः ६१ वैकुंठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः हिरण्यगर्भः शत्रुघ्नो व्याप्तो
वायुरधोक्षजः ६२ ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः उग्रः संवत्सरो द
क्षो विश्रामो विश्वदक्षिणः ६३ विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययं।
अर्थोनर्थो महाकोशो महाभोगो महाधनः ६४ अनिर्वीणः स्थविष्ठो भूर्द्धर्मयू
पो महामखः नक्षत्रनेमी नक्षत्री क्षमः क्षामः समीहनः ६५ यज्ञ इज्यो महेज्यश्च
क्रतुः सत्रं सतां गतिः सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमं ६६ सुव्रतः सुमुखः
सूक्ष्मः सुघोषः सुखदः सुहृत् मनोहरो जितक्रोधो वीरबाहुर्विदारणः ६७ स्वा
पनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः
६८ धर्मगुप् धर्मकृद्धर्मी सदसत्क्षरमक्षरं अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः

वि.स.
५

६९ गभस्तिनेमिःसत्वस्थःसिंहोभूतमहेश्वरः आदिदेवोमहादेवोदेवेशोदेवभृ
द्गुरुः ७० उत्तरोगोपतिर्गोप्ताज्ञानगम्यःपुरातनः शरीरभूतभृद्भोक्ताकपींद्रो
भूरिदक्षिणः ७१ सोमपोमृतपःसोमःपुरुजित्पुरुषोत्तमः विनयोजयस
त्यसंधोदाशार्हःसात्वतांपतिः ७२ जीवोविनयितासाक्षीमुकुंदोमितविक्रमः
अंभोनिधिरनंतात्मामहोदधिशयोंतकः ७३ अजोमहार्हःस्वाभाव्योजितामि
त्रप्रमोदनः आनंदोनंदनोनंदःसत्यधर्मात्रिविक्रमः ७४ महर्षिःकपिलाचा
र्यःकृतज्ञोमेदिनीपतिः त्रिपदस्त्रिदशाध्यक्षोमहाशृंगःकृतांतकृत् ७५ म
हावराहोगोविंदःसुषेणःकनकांगदी गुह्योगंभीरोगहनोगुप्तश्चक्रगदाधरः
७६ वेधास्वांगोजितःकृष्णोदृढःसंकर्षणोच्युतः वरुणोवारुणोवृक्षःपुष्क
राक्षोमहामनाः ७७ भगवान्भगहानंदीवनमालीहलायुधः आदित्योज्यो
तिरादित्यःसहिष्णुर्गतिसत्तमः ७८ सुधन्वाखंडपरशुर्दारुणोद्रविणप्रदः
दिवस्पृक्सर्वदृग्व्यासोवाचस्पतिरयोनिजः ७९ त्रिसामासामगःसामनि
र्वाणंभेषजंभिषक् संन्यासकृच्छमःशांतोनिष्ठाशांतिःपरायणः ८० शुभां
गःशांतिदःस्रष्टाकुमुदःकुवलेशयः गोहितोगोपतिर्गोप्तावृषभाक्षोवृषप्रि
यः ८१ अनिवर्त्तीनिवृत्तात्मासंक्षेप्ताक्षेमकृच्छिवः श्रीवत्सवक्षाःश्रीवासः
श्रीपतिःश्रीमतांवरः ८२ श्रीदःश्रीशःश्रीनिवासःश्रीनिधिःश्रीविभावनः ५

श्रीधरः श्रीकरः श्रेयः श्रीमांल्लोकत्रयाश्रयः ८३ स्वक्षः स्वंगः शतानंदो नंदिर्ज्योति
र्गणेश्वरः विजितात्माविधेयात्मासत्कीर्त्तिः छिन्नसंशयः ८४ उदीर्णः सर्वतश्च
क्षुरनीशः शाश्वतः स्थिरः भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ८५ अ
र्चिष्मानर्चितः कुंभो विशुद्धात्मा विशोधनः अनिरुद्धोप्रतिरथः प्रद्युम्नोमीतिवि
क्रमः ८६ कालनेमीनिहावीरः शौरिः शूरजनेश्वरः त्रिलोकात्मा त्रिलोकेशः के
शवः केशिहाहरिः ८७ कामदेवः कामपालः कामीकांतः कृतागमः अनिर्देश्यव
पुर्विष्णुर्वीरोनंतो धनंजयः ८८ ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ब्र
ह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ८९ महाक्रमो महाकर्मा महातेजो
महोरगः महाक्रतुर्महायज्वा महायज्ञो महाहविः ९० स्तव्यः स्तवप्रियः स्तोत्रं स्तु
तिः स्तोता रणप्रियः पूर्णः पूरयिता पुण्यः पुण्यकीर्त्तिरनामयः ९१ मनोज
वस्तीर्थकरो वसुरेता वसुप्रदः वसुप्रदो वासुदेवो वसुर्वसुमना हविः ९२ सद्ग
तिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामु
नः ९३ भूतावासो वासुदेवः सर्वासुनिलयोनलः दर्पहा दर्पदो दृप्तो दुर्धरोथाप
राजितः ९४ विश्वमूर्त्तिर्महामूर्त्तिर्दीप्तमूर्त्तिरमूर्त्तिमान् अनेकमूर्त्तिरव्यक्तः
शतमूर्त्तिः शताननः ९५ एकोनेकः शवः कः किंयत्तत्पदमनुत्तमं लोकबंधु
र्लोकनाथो माधवो भक्तवत्सलः ९६ सुवर्णवर्णो हेमांगो वरांगश्चंदनांगदी ॥

वि॰स॰ वीरहाविषमःशून्योघृताशीरचलश्चलः ९७ अमानीमानदोमान्योलोकस्वामीत्रि
५ लोकधृक् सुमेधामेधजोधन्यःसत्यमेधाधराधरः ९८ तेजोवृषोद्युतिधरःस
5 र्वशस्त्रभृतांवरः प्रग्रहोनिग्रहोव्यग्रोनैकशृंगोगदाग्रजः ९९ चतुर्मूर्तिश्च
तुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः चतुरात्माचतुर्भावश्चतुर्वेदविदेकपात् १०० समा
वर्तोनिवृत्तात्मादुर्जयोदुरतिक्रमः दुर्लभोदुर्गमोदुर्गोदुरावासोदुरारिहा १ शुभा
गोलोकसारंगःसुतंतुस्तंतुवर्धनः इंद्रकर्मामहाकर्माकृतकर्माकृतागमः २ उद्भ
वःसुंदरःसुंदोरत्ननाभःसुलोचनः अर्कोवाजसनःशृंगीजयंतःसर्वविज्जयी
३ सुवर्णबिंदुरक्षोभ्यःसर्ववागीश्वरेश्वरः महाह्रदोमहागर्तोमहाभूतोमहानि
धिः ४ कुमुदःकुंदरःकुंदःपर्जन्यःपावनोनिलः अमृतांशोमृतवपुःसर्वज्ञः
सर्वतोमुखः ५ सुलभःसुव्रतःसिद्धःशत्रुजिच्छत्रुतापनः न्यग्रोधोदुंबरोश्व
त्थःश्चाणूरांध्रनिसूदनः ६ सहस्रार्चिःसप्तजिह्वःसप्तैधाःसप्तवाहनः अ
मूर्तिरनघोचिंत्योभयकृद्भयनाशनः ७ अणुर्बृहत्कृशःस्थूलोगुणभृन्निर्गु
णोमहान् अधृतःस्वधृतःस्वास्यःप्राग्वंशोवंशवर्द्धनः ८ भारभृत्कथितोयो
गीयोगीशःसर्वकामदः आश्रमःश्रमणःक्षामःसुपर्णोवायुवाहनः ९ धनुर्धरो
धनुर्वेदोदंडोदमयितादमः अपराजितःसर्वसहोनियंतानियमोयमः १० स
त्ववान्सात्विकःसत्यःसत्यधर्मपरायणः अभिप्रायःप्रियार्होर्हःप्रियकृत्प्रीतिवर्द्धनः ५

११ विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः रविर्विरोचनः सूर्यः सविता रविलोच
नः १२ अनंतो हुतभुग्भोक्ता सुखदो नैकदोग्रजः अनिर्विण्णः सदामर्षी लोकाधि
ष्ठानमद्भुतः १३ सनात्सनातनतमः कपिलः कपिरव्ययः स्वस्तिदः स्वस्तिकृत्स्वस्ति
स्वस्तिभुक्स्वस्तिदक्षिणः १४ अरौद्रः कुंडली चक्री विक्रम्यूर्जितशासनः शब्दा
तिगः शब्दसहः शिशिरः शर्वरीकरः १५ अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणांवरः
विद्वत्तमो वीतभयः पुण्यः श्रवणकीर्त्तनः १६ उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्नना
शनः वीरहा रक्षणः शांतो जीवनः पर्युपस्थितः १७ अनंतरूपोनंतश्रीर्जितमन्यु
र्भयापहः चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः १८ अनादिर्भूर्भुवो लक्ष्मीः
सुवीरो रुचिरांगदः जननो जनजन्मादिर्भीमो भीमपराक्रमः १९ आधारनिलयो ।
धाता पुष्पहासः प्रजागरः ऊर्द्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः २० प्रमाणं
प्राणनिलयः प्राणभृत्प्राणजीवनः तत्वं तत्वविदेकात्मा जन्ममृत्युजरातिगः २१
भूर्भुवः स्वस्तरुस्तारः सपिताप्रपितामहः यज्ञो यज्ञपतिर्यज्वा यज्ञांगो यज्ञवाहनः ।
२२ यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः यज्ञांतकृद्यज्ञगुह्यमन्नमन्नाद एव च
२३ आत्मयोनिः स्वयंजातो वैखानः सामगायनः देवकीनंदनः स्रष्टा क्षितीशः पाप।
नाशनः २४ शंखभृन्नंदकी चक्री शार्ङ्गधन्वा गदाधरः रथांगपाणिरक्षोभ्यः सर्व
प्रहरणायुधः २५ ओंनमोनमः इतीदं कीर्तनीयस्य केशवस्य महात्मनः नाम्ना

वि॰स॰
६
6

सहस्रंदिव्यानामशेषेणप्रकीर्त्तितं २६ यइदंशृणुयान्नित्यंयश्चापिपरिकीर्त्तयेत्।
नाशुभंप्राप्नुयात्किंचित्सोमुत्रेहचमानवः २७ वेदांतगोब्राह्मणःस्यात्क्षत्रियोविज
यीभवेत् वैश्योधनसमृद्धःस्यात्शूद्रःसुखमवाप्नुयात् २८ धर्मार्थीप्राप्नुयाद्ध
र्ममर्थार्थीचार्थमाप्नुयात् कामानवाप्नुयात्कामीप्रजार्थीप्राप्नुयात्प्रजां २९ भ
क्तिमान्यःसदोत्थायशुचिस्तद्गतमानसः सहस्रंवासुदेवस्यनाम्नामेतत्प्रकीर्त्तये
त् ३० यशःप्राप्नोतिविपुलंज्ञातिप्राधान्यमेवच अचलांश्रियमाप्नोतिश्रेयःप्राप्नो
त्यनुत्तमं ३१ नभयंक्वचिदाप्नोतिवीर्यंतेजश्चविंदति भवत्यरोगोद्युतिमान्बल
रूपगुणान्वितं ३२ रोगार्त्तोमुच्यतेरोगाद्बद्धोमुच्येतबंधनात् भयान्मुच्येतभीत
श्चमुच्येदापन्नआपदः ३३ दुर्गाण्यतितरत्याशुपुरुषःपुरुषोत्तमः स्तुवन्नाम
सहस्रेणनित्यंभक्तिसमन्वितः ३४ वासुदेवाश्रयोमर्त्योवासुदेवपरायणः स
र्वपापविशुद्धात्मायांतिब्रह्मसनातनं ३५ नवासुदेवभक्तानामशुभंविद्यतेक्वचि
त् जन्ममृत्युजराव्याधिभयंनैवोपजायते ३६ इदंस्तवमधीयानःश्रद्धाभक्तिसम
न्वितः युज्येतात्मसुखक्षांतिश्रीधृतिस्मृतिकीर्तिभिः ३७ नक्रोधोनचमात्सर्यंन
लोभोनाशुभामतिः भवंतीकृतपुण्यानांभक्तानांपुरुषोत्तमे ३८ द्यौःसचंद्रार्कनक्ष
त्राखंदिशोभूर्महोदधिः वासुदेवस्यवीर्येणविधृतानिमहात्मनः ३९ ससुरासुर
गंधर्वंसयक्षोरगराक्षसं जगद्वशेवर्त्ततेदंकृष्णस्यसचराचरं ४० इंद्रियाणिम ६

नोबुद्धिःसत्वंतेजोबलंधृतिः वासुदेवात्मकान्याहुःक्षेत्रंक्षेत्रज्ञमेवच ४१ सर्वागमा
नामाचारःप्रथमंपरिकल्पते आचारप्रभवोधर्मोधर्मस्यप्रभुरच्युतः ४२ ऋषयःपि
तरोदेवामहाभूतानिधातवः जंगमाजंगमंचेदंजगन्नारायणोद्भवं ४३ योगोज्ञानं
तथासांख्यंविद्याशिल्पादिकर्मच वेदाःशास्त्राणिविज्ञानमेतत्सर्वंजनार्दनात् ४४
एकोविष्णुर्महद्भूतंपृथग्भूतान्यनेकशः त्रीँल्लोकान्व्याप्यभूतात्माभुंक्तेविश्वभु
गव्ययः ४५ इमंस्तवंभगवतोविष्णोर्व्यासेनकीर्तितं पठेद्यइच्छेत्पुरुषःश्रेयःप्रा
प्तुंसुखानिच ४६ विश्वेश्वरमजंदेवंजगतःप्रभवाप्ययं भजंतियेपुष्कराक्षंनते
यांतिपराभवं ४७ अर्जुनौवाच पद्मपत्रविशालाक्षपद्मनाभसुरोत्तम भक्ताना
मनुरक्तानांत्राताभवजनार्दन ४८ श्रीभगवानोवाच योमांनामसहस्रेणस्तो
तुमिच्छतिपांडव सोहमेकेनश्लोकेनस्तुतएवनसंशयः ४९ नमोस्त्वनंतायसह
स्रमूर्त्तयेसहस्रपादाक्षिशिरोरुबाहवे सहस्रनाम्नेपुरुषायशाश्वतेसहस्रकोटी
युगधारिणेन्नमः ५० नमःकमलनाभायनमस्तेजलशायिने नमस्तेकेशवा
नंतवासुदेवनमोस्तुते ५१ वासनाद्वासुदेवस्यवासितंभुवनत्रयं सर्वभूतनिवासी
नोवासुदेवनमोस्तुते ५२ नमोब्रह्मण्यदेवायगोब्राह्मणहितायच जगद्धितायकृ
ष्णायगोविंदायनमोनमः ५३ आकाशात्पतितंतोयंयथागच्छतिसागरे सर्वदेव
नमस्कारंकेशवंप्रतिगच्छति ५४ एषनिष्कंटकःपंथायत्रसंपूज्यतेहरिः कुपथं

तंविजानीयाज्ज्ञेयोविंदंरहितागमं ५५ सर्ववेदेषुयत्पुण्यंसर्वतीर्थेषुयत्फलं तत्फलं
सममाप्नोतिस्तुत्वादेवंजनार्दनं ५६ योनरःपठतेनित्यंत्रिकालंकेशवालये द्वि
कालमेककालंवाक्रूरंसर्वंव्यपोहति ५७ दह्यंतेरिपवस्तस्यसौम्याःसर्वेसदा
ग्रहाः विलीयंतेचपापानिस्तवेह्यस्मिन्प्रकीर्तिते ५८ येनध्यातंश्रुतंयेनये
नायंपठितस्तवः दत्तानिसर्वदानानिसुराःसर्वेसमर्चिताः ५९ इहलोकेपरेवा
पिनभयंविद्यतेक्वचित् नाम्नांसहस्रंयोधीतेद्वादश्यांममसन्निधौ ६० शनि
र्दहतिपापानिकल्पकोटिशतानिच अश्वत्थसंनिधौपार्थतत्त्वमानसिकेशवं
६१ पठेन्नामसहस्रंतुगवांकोटिफलंलभेत् शिवालयेपठेन्नित्यंतुलसीवन
संस्थितः ६२ नरोमुक्तिमवाप्नोतिचक्रपाणेर्वचोयथा ब्रह्महत्यादिकंपापंस
र्वपापंविनश्यति ६३ इतिश्रीमहाभारतेशतसहस्रसंहितायांवैयासिक्यां।
शांतिपर्वणिउत्तमानुशासनेदानधर्मेषुश्रीविष्णोर्दिव्यसहस्रनामसंपूर्णं॥
शुभंभवतु श्रीरस्तु श्रीकृष्णार्पणमस्तु नारायणायेति राम राम राम